॥ अथविषयतावादप्रारम्भः ॥

 श्रीगणेशाय नमः॥ बुद्धिर्नाम कश्चिदात्मविशेषगुणः। तद्व्यवस्थितिः घटमहं जानामीत्याकारकाऽऽपामरसाधारणानुभवबलादेव। सा च सविषयिका। उक्तधर्मिग्राह
 कप्रतीत्या घटादिविषयकत्वेनैव तदवगाहनात्। घटादिनिष्ठं तद्विषयत्वं च तत्प्रतियोगिकः संबन्धविशेषः। स च प्रतियोगित्वादिवत् स्वरूपादनतिरिक्त एव। क्लृप्तेन स्वरू
पेणैवोपपत्तौ अतिरिक्तकल्पनायास्त्वनवकाशात्। न च तादृशसम्बन्धस्य ज्ञानस्वरूपता विषयस्वरूपता वा स्वीक्रियत इत्यत्र विनिगमनाविरहादुभयस्यैव संबन्धताकल्पने तद
पेक्षया लाघवात् संबन्धत्वेनातिरिक्तैकविषयताकल्पनमेवोचितमिति वाच्यम्। विषयताया विषयस्वरूपत्वे विषयेण समं तस्या आधाराधेयभावानुपपत्तेः। ज्ञानस्वरू
पाया एव तस्या उपगमात्। अभेदेप्याधाराधेयभावोपगमे घटो ज्ञानविषयतावानितिवद् घटो घटवानित्यादिप्रतीत्यापत्तेः। न च विषयतात्वावच्छिन्ननिरूपिताऽधिकर
णतैव घटादावुपेयते न घटत्वावच्छिन्नाऽधिकरणतेति नातिप्रसङ्ग इति वाच्यम्। तदवच्छिन्ननिरूपितत्वस्य तदाश्रयनिरूपितत्वविलक्षणस्य दुर्वचत्वात्। अस्तु वा विनि
गमनाविरहादुभयमेव विषयत्वं तथापि तादृशोभयस्य क्लृप्तत्वादतिरिक्तविषयतायास्तत्र ज्ञानादिसंबन्धताया अकल्पनापेक्षया तदुभयस्य ज्ञानादिसंबन्धत्वकल्पने गौ
रवानवकाश इति सिद्धान्तानुयायिनः। नव्यास्तु विषयत्वं पदार्थान्तरमेव न तु स्वरूपसंबन्धविशेषः। तथाहि। ज्ञानविषयताया ज्ञानात्मकत्वे ज्ञानाधिकरणकालस्यापि ज्ञानविष
यतापत्तिः। कालिकनिष्ठतत्संबन्धस्यापि तत्स्वरूपानतिरिक्तत्वात्। एवं स्वाभावेन समं प्रतियोग्यनुयोगिभावरूपज्ञानसंबन्धस्यापि स्वरूपानतिरिक्ततया घटादिज्ञानस्य घटा
दिविषयकत्ववत् स्वाभावविषयकत्वस्यापत्तिः। कालादौ ज्ञानादिसंबन्धस्यातिरिक्तत्वे च विनिगमनाविरहाद्विषयनिष्ठतत्संबन्धस्याप्यतिरिक्तत्वसिद्धिर्निष्प्रत्यूहैव। एवं विषयता
या ज्ञानस्वरूपत्वे घटपटावित्यादिसमूहालम्बनात्मकैकज्ञानीयघटपटादिरूपनानाविषयनिष्ठविषयतानामैकैकतया तादृशज्ञानानां घटत्वपटत्वाद्यवच्छिन्नघटपटादिनिष्ठ
विषयताकतया भ्रमत्वापत्तिः। तद्वृत्तिधर्मावच्छिन्नतन्निष्ठविषयताशालिबुद्धेरेव भ्रमत्वात्। तादृशज्ञानानन्तरं घटत्वेन पटं जानामीत्याकारकानुव्यवसायापत्तिश्च।
घटत्वावच्छिन्नपटनिष्ठविषयताकज्ञानस्यैव तादृशानुव्यवसायविषयत्वात्। न च तादृशसमूहालम्बनीयघटपटादिनिष्ठविषयताया ऐक्येऽपि सा विषयता घटत्वाद्यवच्छिन्न

विषयतात्वेनघटएववर्त्ततेपटत्वाद्यवच्छिन्नविषयतात्वेनपटएववर्त्ततेऽतोनतादृशधियोभ्रमत्वापत्तिः।नद्वृत्तियोधर्मस्तदवच्छिन्नविषयतात्वेननतद्वृत्तियोविषयतात
त्प्रतियोगिनएवज्ञानस्यभ्रमत्वात्।नवातादृशसमूहालम्बनानन्तरमुक्तानुव्यवसायप्रसङ्गः।पटत्वाद्यवच्छिन्नविषयतात्वेनपटादिवृत्तिविषयताप्रतियोगिनएवज्ञान
स्यतद्विषयत्वादितिवाच्यम्।यतःपटत्वाद्यवच्छिन्नविषयतात्वेनघटादिवृत्तित्वंहितद्रूपावच्छिन्ननिरूपितघटादिनिष्ठाधिकरणताकत्वंतादृशीचाधिकरणतापदिशुद्ध
विषयतात्वावच्छिन्ननिरूपिताधिकरणतातोनातिरिक्तातदातादृशज्ञानीयघटादिनिष्ठविषयतायामपितादृशाधिकरणताकत्वमक्षतमेव।अतिरिक्तात्वेनहिंकिमपराद्ध
मतिरिक्तविषयतयेति।विषयतायाविषयस्वरूपत्वेचघटत्वप्रकारकप्रमाविषयतायाःपटत्वप्रकारकभ्रमनिरूपितायाश्चघटनिष्ठविषयतायाऐक्यप्रसङ्गेनघटत्वप्रकारक
प्रमायाअपिभ्रमत्वापत्तिः।एवंघटवद्भूतलंघटभूतलसंयोगाइतिज्ञानयोरविशेषप्रसङ्गश्च।विषयाणांतदात्मकविषयतानांचाविलक्षणत्वात्।नचप्रथमज्ञानेसंबन्ध
विधयाभासमानस्यसंयोगस्यसंबन्धोऽप्यधिकोभासतेनतुसमूहालम्बनरूपेचरमज्ञानेऽयमतएवउभयोर्वैलक्षण्यमित्युपाध्यायमतंसम्यक्।संयोगादिप्रतियोगिकसंब
न्धमादायापिसमूहालम्बनसंभवात्।नचसंयोगसंसर्गकविशिष्टबुद्धौसंयोगःस्वरूपतएवभासतेनतुसंयोगत्वेनसखण्डपदार्थस्यापिसंबन्धविधयास्वरूपतोभा
नोपगमात्।उक्तसमूहालम्बनेचसंयोगत्वेनसंयोगोभासतइतिसंयोगत्वरूपाधिकविषयभानाभानाभ्यामेवतयोर्विशेषइतिवाच्यम्।एवमपिघटवद्भूतलंसंयो
गश्चघटभूतलसंयोगाइतिज्ञानयोर्विशेषानिर्वाहात्।घटवद्भूतलमितिज्ञानस्यघटप्रकारकत्वमेवघटविशेष्यकोक्तसमूहालम्बनाद्विशेषइतिचेत्घटप्रकारक
त्वंहिघटनिष्ठप्रकार ताप्रतियोगित्वंघटविशेष्यताकत्वंचघटनिष्ठविशेष्यताप्रतियोगित्वंतत्रचज्ञानीयप्रकारताविशेष्यतेयदिप्रकारविशेष्यतेयदिप्रकारवि
शेष्याभ्यामनतिरिक्तेतदोक्तविशिष्टबुद्धेरपिघटविशेष्यकत्वमुक्तसमूहालम्बनस्यापिघटप्रकारकत्वंदुर्वारमेवघटात्मकयोस्तन्निष्ठप्रकारताविशेष्यतयोर्भवन्मतेऽ
भिन्नत्वात्।यदिचतेअतिरिक्तेतदासिद्धंनःसमीहितम्।प्रकारताविशेष्यतयोर्विषयतात्मकत्वात्।यत्तुभासमानवैशिष्ट्यप्रतियोगित्वंप्रकारत्वंतादृशवैशिष्ट्यानुयोगित्वं

ग०दि० विशेष्यत्वं न विषयतारूपमिति तदसत्। उक्तसमूहालम्बनस्यापि घटप्रतियोगिकवैशिष्ट्यविषयकतया घटप्रकारकत्वापत्तेः। संयोगादिरूपव्यधिकरणसंबन्धेन द्र
२ व्यत्वादिभ्रमस्य द्रव्यत्वादिप्रकारकत्वानुपपत्तेः। भूतले घट इत्यादिज्ञानस्य भूतलाद्यनुयोगिकसंयोगादिविषयकतया भूतलादिविशेष्यकतयापत्तेः। गुणादौ संयोगादिसं
बन्धेन घटादिभ्रमस्य गुणादिविशेष्यकत्वानुपपत्तेश्च। अथ वास्तवतादृशवैशिष्ट्यप्रतियोगित्वानुयोगित्वे न प्रकारताविशेष्यत्वे येनोक्तदोषाणामवसरः। अ
पि तु वैशिष्ट्यप्रतियोगितया तदनुयोगितया चावभासमानत्वमेव प्रकारत्वं विशेष्यत्वं चेति चेन्न। प्रतियोगितयेत्यादौ तृतीयार्थस्य दुर्वचत्वात्। भासमानत्वस्य ज्ञानविषय
तात्मकतया प्रकारताविशेष्यतयोर्विषयतात्वसिद्धेश्च। यत्तु विषयत्वं न केवलज्ञानस्वरूपं नापि केवलविषयस्वरूपम्। अपि तु ज्ञानविषयोभयरूपम्। अतो न प्रागुक्त
दोषाणामवसरः। तथा हि घटपटावित्यादिसमूहालम्बनीयघटादिनिष्ठतज्ज्ञानघटाद्युभयात्मकघटत्वावच्छिन्नविषयतायाः पटादिनिष्ठतज्ज्ञानपटाद्युभया
त्मकपटत्वाद्यवच्छिन्नविषयतानात्मकतया न तादृशज्ञानस्य भ्रमत्वापत्तिः नवोपदर्शितविशिष्टधीसमूहालंबनयोरविशेषप्रसङ्गः। तादृशसमूहालम्बनस्य तथा
विधविशिष्टबुद्धिनिरूपिततज्ज्ञानघटाद्यात्मकप्रकारत्वानिरूपकत्वेन विषयतावैलक्षण्यसत्त्वादिति। तदप्यसत् घटपटावित्येतादृशसमूहालम्बनात्मकज्ञा
नस्य तज्ज्ञानपटोभयात्मकपटत्वावच्छिन्नपटनिष्ठविषयताघटकत्वेन घटत्वावच्छिन्नघटनिष्ठतज्ज्ञानघटोभयात्मकविषयताघटकत्वेन च घटनिष्ठाया पटत्वावच्छिन्न
तज्ज्ञानरूपाविषयतातन्निरूपकत्वेन भ्रमत्वापत्तेर्दुर्वारत्वात्। अथ तद्धर्मावच्छिन्नविषयतात्वं तज्ज्ञानतत्तद्विषययोर्व्यासज्यवृत्त्युपेयते। एवं च तद्धर्मावच्छिन्नविषयतात्वेन
तद्धर्मानधिकरणवृत्तिर्या विषयता तत्प्रतियोगित्वं भ्रमत्वम्। उपदर्शितसमूहालम्बने च पटत्वाद्यवच्छिन्नविषयतात्वस्य तज्ज्ञानपटाद्युभयपर्याप्ततया तेन रूपेण तदुभयात्मक
विषयतानां घटादिवृत्तिः। घटादेस्तद्रूपाश्रयपटाद्यात्मकविषयत्वासम्बन्धित्वात् स्वाश्रययावद्वृत्तिसम्बन्धिन एव व्यासज्यवृत्ति धर्मपुरस्कारेण तदाश्रयत्वादिति न
तस्य भ्रमत्वापत्तिरिति चेन्न। पटत्वाद्यवच्छिन्नविषयतात्वं स्वरूपातिरिक्तं न वा। आद्ये किमपराद्धं तद्रूपावच्छिन्नातिरिक्तविषयतया। अन्त्ये च तस्य व्यासज्यवृत्तिता २

नुपपत्तिः। तत्तत्स्वरूपस्य प्रत्येकविश्रान्तत्वात्। एवं तद्रूपेण घटादिवृत्तित्वं विषयतात्वेन घटादिवृत्तित्वादतिरिक्तं न वा। आद्ये किमपराद्धमतिरिक्तविषयतया। अन्त्ये त
द्रूपेण घटादिवृत्तित्वं तादृशज्ञानीयस्वात्मकविषयताया अस्तमेव। एवं जातिमान् घट इत्यादौ घटत्वाद्येकविषयवृत्तिरेकज्ञानीयविषयताया जातित्वाद्यवच्छि
न्नत्वतदनवच्छिन्नत्वाभ्यां द्वैविध्यमनुपपन्नम्। ज्ञानस्य विषयस्य च द्वैविध्यविरहात्। तथा च जातिमान् नित्य इत्याकारकैकविधघटत्वादिविषयताशालिज्ञानानां तादृश
ज्ञानस्य विलक्षणविषयताशालित्वानुपपत्त्या विलक्षणाकारकतानुपपत्तिः। तस्माद्विषयतामतिरिक्तमेव। अथ विषयतावद्विषयेऽनुयोगितारूपस्तत्संबन्धो ज्ञाने प्रतियोगि
तारूपस्तत्संबन्धश्च तुल्ययुक्त्याऽतिरिक्त एवोपगन्तव्यः। स्वरूपानतिरिक्तत्वे ज्ञानविषयनिष्ठयोस्तत्संबन्धयोरविलक्षणतापत्त्या ज्ञानस्येव विषयस्यापि सविषयकत्वं वि
षयवज्ज्ञानस्यापि तद्विषयत्वमापद्येत। एवं विषयताया ज्ञानघटादिनिष्ठेन संबन्धेन समं कालाभावादिनिष्ठसंबन्धस्याप्यनतिरिक्तत्वे वैलक्षण्यानुपपत्त्या कालाभावादीना
मपि घटादिविषयकत्वापत्तिः। घटज्ञानादिविषयतापत्तिश्च। एवं तुल्ययुक्त्या तादृशसंबन्धस्यापि संबन्धस्तत्संबन्धादिरप्यतिरिक्तः स्वीकरणीय इत्यनवस्थितसंबन्धधाराकल्पनप्र
सङ्गः। एवं विषयतासंबन्धेऽपि ज्ञानस्य तदीयतानियामको निरूप्यत्वाख्यसंबन्धविशेषस्तुल्ययुक्त्यातिरिक्तः स्वीकरणीयः। एवं तत्संबन्धादिरपीति तत्रापि संबन्धधा
रयानवस्थापत्तिरिति चेत्। का क्षतिः। न हि प्रामाणिकानवस्थाया दूषणावहत्वम् विषयतावद्विषयित्वरूपज्ञानानुयोगिकविषयसंबन्धोऽप्यतिरिक्त एव। ननु विषयता
प्रतियोगित्वमेव विषयित्वं विषयित्वमेव वाति रिक्तं तत्प्रतियोगित्वमेव विषयत्वमित्यस्यापि वक्तुं शक्यतया द्वयोरेवातिरिक्ततासिद्धेरिति। विषयता च विषयभेदाद्भिद्यते।
अन्यथा घटपटावित्यादिसमूहालम्बनीयघटपटादिनिष्ठविषयताया ऐक्ये पूर्वोक्तयुक्त्या तादृशज्ञानस्य भ्रमत्वापत्तिः। घटाद्येकैकविषयकज्ञानीयैकैकवृत्तिविषय
तानां तत्समूहालम्बने नानाविषयवृत्त्यतिरिक्तैकविषयताकल्पनप्रसङ्गेन गौरवाच्च। अस्मन्मते समूहालम्बने क्रमप्रत्येकज्ञानीयविषयतानामेवोपगमात्। ज्ञा
नभेदेन विषयताभेदे मानाभावात्। एतेन घट इत्यादिविशिष्टबुद्धौ विशेष्यविशेषणभावापन्नेषु घटघटत्वादिष्वेकैव विषयता। ननु विशेष्यनिष्ठा विशेषणनिष्ठा च विष

ग·वि· यताभिन्नाभिन्नेतिमतं हेयमेव। विशेष्यनिष्ठयाविशेष्यतात्मकविषयतया समं विशेषणनिष्ठप्रकारतात्मकविषयताया अभेदस्यासंभवदुक्तिकत्वात्। तथासतिताद
३ शबुद्धौ घटप्रकारकत्वघटत्वविशेष्यकत्वयोरापत्तेः। न च प्रकारताविशेष्यतयोर्विषयतारूपतायामेवेयमनुपपत्तिः। सैव ना। अपितु पदार्थान्तरत्वे। न तयोर्विषयता
त्वे मानाभावादिति वाच्यम्। विषयेष्यतिरिक्तविषयतानां तत्र च विषयतात्वकल्पनामपेक्ष्य विषयवृत्तित्वेन क्लृप्तानां प्रकारताविशेष्यतानां विषयतात्वकल्पनस्यै
व न्याय्यत्वात्। यत्तु निर्विकल्पकीयाप्रकारताविशेष्यताभिन्नत्वेनोभयसिद्धाया विषयताविशिष्टज्ञानस्यापि सैव विषये संबन्धः। तत एव च विशिष्टबुद्धेरपि सविषय
कत्वनिर्वाहोस्तु किं प्रकारतादीनां विषयतात्वोपगमेन। प्रकारतादीनां विषयतानात्मकत्वेपि तद्वैलक्षण्यस्य ज्ञानवैलक्षण्यसम्पादकत्वेन कश्चिद्विरोध इत्यपि हेय
मेव। प्रकारताविशेष्यतयोर्विषयतात्वानुपगमे व्याप्यपक्षविशेष्यकपरामर्शीयो व्याप्यविषयतानिरूपितपक्षविषयताशालित्वेनानुगमय्यानुमितिहेतुत्वासंभ
वात्कारणताबाहुल्यापत्तेः। निर्विकल्पकीयविषयतायाः परस्परनिरूप्यनिरूपकभावविरहात् एवं संसर्गज्ञानस्यानुपनायकतामते उपनीतभानं प्रति उपनायकज्ञा
नत्वप्रकारकत्वेन तद्विशेष्यकत्वेन च हेतुताद्वयप्रसङ्गः। मन्मते तु प्रकारताविशेष्यते संसर्गभिन्नविषयतात्वेनानुगमय्य एकहेतुताकल्पनसंभवात्। एवं निर्विकल्पकी
यविषयतायाः विशिष्टबुद्धावुपगमे घटत्वादिनिर्विकल्पकादिव जातित्वादिना घटत्वादिज्ञानादपि स्वरूपतो घटत्वादिप्रकारिकाया घट इत्याद्याकारकविशिष्टबुद्धे
रापत्तिः। न च स्वरूपतस्तद्विशिष्टबुद्धौ तद्विशेष्यकतज्ज्ञानत्वेन हेतुत्वान्नायं दोष इति वाच्यम्। तथा सति जातिर्घट इत्यादिज्ञानाद्घट इत्यादिविशिष्टबुद्ध्यनुपपत्ते
रिति। यत्तु विशिष्टबुद्धिविषयताविशेष्यमात्र   वृत्तिः। न तु विशेषणेपि सामानाभावात्। न च विनिगमनाविरहः। घट इत्यादिज्ञानानन्तरं घटं जानामीत्याद्यनुव्यवसा
येन घटरूपविशेष्येण समं ज्ञानस्य संबन्धावगाहनात् घटादिरूपविशेष्ये ज्ञानस्य विषयतात्मकसंबन्धस्यावश्योपेयत्वात्। घटत्वं जानामीत्याद्यनुव्यवसायस्तु तत्रासिद्ध एव तस्य घ
टत्वत्वविशिष्टवैशिष्ट्यावगाहित्वेन घटत्वत्वप्रकारकव्यवसायानन्तरमेव तत्संभवात्। घट इत्यादिव्यवसायस्य च स्वरूपत एव घटत्वादिप्रकारकतया घटत्वत्वाद्यप्रकारकत्वात्। ज्ञा ३

नांशेस्वरूपतोघटत्वादिविशेषणकोनुव्यवसायोपिनतत्रसंभवति।स्वसंबन्धिकपदार्थेप्रत्यक्षस्यकिंचिद्विशिष्टसंबन्धिवैशिष्ट्यावगाहित्वनियमात्।नचायंघटइत्या
द्यव्यवसायानन्तरंघटत्वेनेमंजानामीत्याद्याकारकानुव्यवसायेनघटत्वादिरूपविशेषणेनापिसमंज्ञानस्यसंबन्धावगाहनात्तत्रापिविशिष्टधीविषयताभ्युपगमस्याव
श्यकइतिवाच्यम्।यतस्तत्रज्ञानान्वयिवैशिष्ट्यंनतृतीयार्थः।अपितुद्वितीयार्थविषयतान्वयि घटत्वादिप्रकारकत्वम्।नचविषयतानिष्ठंघटत्वादिप्रकारकत्वं
घटत्वादिनिष्ठंप्रकारतानिरूपकत्वंतदभ्युपगमएवचविशेषणीभूतघटत्वादेर्विशिष्टधीविषयतासिद्धिर्निष्प्रत्यूहैव।प्रकारतायाविषयताविशेषात्मकत्वादितिवाच्यम्
यतोविषयतानिष्ठंघटत्वादिप्रकारकत्वंनघटत्वादिनिष्ठप्रकारतास्यविषयतानिरूपकत्वम्।अपितुघटत्वाद्यवच्छिन्नत्वम्।अवच्छिन्नत्वंचप्रतियोगित्वकारणत्वाधिकरणत्वादावि
वविषयतादावपिघटत्वादेःसंबन्धविशेषणमेव।सचातिरिक्तोऽनतिरिक्तोवेत्यन्यदेतत्।इयांस्तुविशेषः।प्रतियोगित्वादावन्यूनानतिप्रसक्तत्वमवच्छेद्यावच्छेदकभावेनतत्र
म्।नतुविषयतास्थलेऽधिकरणधर्मस्यापिविषयतावच्छेदकत्वात्विशेषणनिरूपितत्वमेववाविषयतानिष्ठतत्प्रकारकत्वम्।अस्तुवाविशेषणेविषयतानिरूपितःप्रकार
ताख्यधर्मविशेषः।तथापितस्यविषयतात्वेज्ञानप्रतियोगित्वेचमानाभावइतिअतिरिक्तविषयतावादिनांप्राचीनैकदेशिनांमतं तदप्यनुपादेयमेव।विशेषणस्याविशि
ष्टज्ञानाविषयत्वेतद्धर्मेविशिष्टज्ञानानन्तरंतद्धर्मविशिष्टज्ञानानुपपत्तेः।विशिष्टबुद्धौविशेषणविषयकज्ञानस्यहेतुत्वात्।भवन्मतेतद्विशिष्टज्ञानस्यतद्विषयकज्ञान
त्वाभावेनतद्धेतुत्वात्।एवंविशिष्टज्ञानाद्विशेषणविषयकोपनीतभानस्याप्यनुपपत्तिः।तदुपनीतभानेतद्विषयकज्ञानस्यैवहेतुत्वात्। एतादृशयुक्त्याविशेषणस्यविशिष्टधीविष
यतायाआवश्यकत्वेचउक्तलाघवात्तन्निष्ठप्रकारतायाएवविषयतात्वसिद्धिरित्यवधेयम्।अथतद्विशिष्टबुद्धौतदुपनीतभानेचस्ववृत्तिस्वप्रकारकत्वान्यतरसंब
न्धेनतद्विशिष्टायाविषयतायास्तच्छालिज्ञानत्वेनैवहेतुतावाच्या।इत्थंचविशेषणस्याविशिष्टज्ञानाविषयत्वेपितद्विशिष्टज्ञानात्तद्विशिष्टज्ञानान्तरस्यतदुपनीतभानस्यचनानुपप
त्तिः।नचोपदर्शितकारणतावच्छेदककोटौअन्यतरसंबन्धेनतद्वैशिष्ट्यस्यविषयतायांनिवेशेअन्यतरत्वघटकभेदयोर्मिथोविशेष्यविशेषणभावेविनिगमनाविरहे

ग·वि· णकारणतावाहुल्यमितिवाच्यम्। यतस्तादृशान्यतरस्यान्यतरत्वेननसंबन्धता अपितुस्वरूपतएव। नचैवमप्यननुगमात्कारणताधिक्यं व्यभिचारश्चेतिवाच्यम्। संब
४ न्धाननुगमेपितावन्निष्ठसंबन्धतायाऐक्योपगमेनतद्दोषानवकाशात्। अतएवसंबन्धाननुगमोनदोषायेतिप्राचांप्रवादोपि। नचैवमपिस्वप्रकारकत्वस्ववृत्तिता
न्यतरसंबन्धेनतद्विशिष्टविषयतामुपेक्ष्यस्ववृत्तित्वसंबन्धेनतद्विशिष्टविषयतायालाघवेनतद्विशिष्टबुद्ध्यादिजनकतावच्छेदकत्वसिद्धेर्निष्प्रत्यूहतयाविशेषणस्यापिवि
शिष्टधीविषयत्वंदुर्वारमितिवाच्यम्। प्रकारतायांविषयतात्वोपगमेपटत्वादिरूपेणघटादिविषयकस्मरणादौतथाविधज्ञानस्यघटत्वादिप्रकारतानिरूपितघटादि
निष्ठविषयताशालिज्ञानत्वेनघटादिनिष्ठविशेष्यतानिरूपितघटत्वादिप्रकारताशालिज्ञानत्वेनवाहेतुत्वेगौरवात्। अस्मन्मतेचैनेनादृशविनिगमनाविरहावकाशः
।विशेष्यतानिरूपितप्रकारतायाज्ञानप्रतियोगिकत्वाभावेनपरंपरासंबन्धेनैवतस्याः जनकतावच्छेदकत्वस्योपगन्तव्यतयातदपेक्षयाप्रकारतानिरूपितविशेष्यतायाः
प्रतियोगितासंबन्धेनजनकतावच्छेदकलाघवस्यैवविनिगमकत्वात्। मैवम्। उक्तविशेषणज्ञानादिकारणतावच्छेदकलाघवेनप्रकारतायांविषयतात्वस्यज्ञानप्र
तियोगित्वस्यचसिद्धावेवदर्शितस्मरणादिहेतुतायांविनिगमनाविरहावतारेगौरवावतारात्तादृशगौरवस्यफलमुखत्वेनादोषत्वात्। प्रसिद्धिमुपजीव्यगौरवावतारस्तत्सि
द्धौतस्यविरोधित्वासम्भवात्। घटवद्भूतलमित्यादिविशिष्टबुद्ध्यनन्तरंभूतलंजानामीत्यनुव्यवसायवद्घटंजानामीत्याद्याकारकस्यज्ञानघटादिसंबन्धावगाहिनोऽनुव्यवसायस्या
पिसर्वानुभवसिद्धतयाविशेषणेपिविषयतात्मकज्ञानसंबन्धआवश्यकः। नचतत्रस्वप्रकारकविषयताकत्वरूपपरम्परासंबन्धएवज्ञानेघटस्यानुव्यवसायेनगृह्यतइतिवाच्य
म्। विशेषणीभूतघटादिरेवतादृशविशिष्टबुद्धिविषयः। नतुभूतलादिरूपविशेष्यम्। भूतलंजानामीत्याद्यनुव्यवसायेनतुस्वविशेष्यकविषयताप्रतियोगित्वरूपभूतलादिनिरूपित
परंपरासंबन्धएवज्ञानादौगृह्यतइत्यस्यापिसुवचतयाविनिगमनाविरहेणविशेषणविशेष्ययोरुभयोरेवविशिष्टधीविषयतासिद्धेर्निराबाधत्वादित्याहुः। विशेष्यताप्रकारतावत्
संसर्गत्वस्यापिविषयताविशेषात्मकत्वात्संसर्गस्यापिविशिष्टधीविषयत्वम्। अत्रोच्छृङ्खलाः। संसर्गस्यविशिष्टधीविषयत्वेमानाभावः। घटइत्यादिज्ञानानन्तरंसमवायंजाना

भान्यायाकारकानुव्यवसायस्यासिद्धत्वात्। नादृशानुव्यवसायस्य समवायत्वविशिष्टवैशिष्ट्यावगाहितया समवायत्वप्रकारकज्ञानानन्तरमेव तत्संभवात्। अथ वि
शिष्टबुद्धेः संसर्गानवगाहित्वे बाधबुद्धिप्रतिबन्धकतायाः संसर्गविशेषनियन्त्रितत्वासंभवात्कपालधर्मिकसंयोगादिसंबन्धावच्छिन्नप्रतियोगिताकघटाद्यभाववत्ता
निश्चयस्य समानधर्मितावच्छेदककं किंचिदेव घटादिप्रकारकं ज्ञानं प्रतिबध्नातु सर्वमित्यनुभवव्याकोपः। न च बाधप्रतिबन्धकतायाः संबन्धविशेषनियन्त्रित
त्वानुरोधेन तत्प्रतिबध्यस्य धर्मितावच्छेदकबुद्धेः संबन्धावगाहित्वसिद्धावपि निर्धर्मितावच्छेदकबुद्धेस्तथात्वं निर्युक्तिकमिति वाच्यम्। निर्धर्मितावच्छेदकवि
शिष्टबुद्धेरपि ग्राह्यधर्मिकावृत्तित्वज्ञान प्रतिबध्यतया अवृत्तित्वज्ञानप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन तत्रापि संबन्धावगाहित्वस्यावश्य
कत्वात्। एवं प्रमात्वभ्रमत्वयोः संबन्धविशेषनियन्त्रितत्वानिरोधेनापि सकलविशिष्टबुद्धीनां संबन्धावगाहित्वमावश्यकम्। तयोस्तथात्वानुपगमे कपालविशेष्य
कघटादिप्रकारकं किंचिदेव ज्ञानं प्रमा न तथाविधं च किंचिदेव ज्ञानं भ्रम इति प्रतीतिर्न स्यात्। अपि तु कपालादेः समवायेन घटादिमत्तया तथाविधं सकलमेव ज्ञा
नं प्रमा स्यात्संयोगादिसंबन्धावच्छिन्नप्रतियोगिताकघटाद्यभाववत्तया च तथाविधं सकलमेव ज्ञानं भ्रमः स्यादिति चेन्न विशिष्टबुद्धेः संबन्धविषयकत्वान
भ्युपगमेपि तटस्थेन संसर्गेण समं प्रकारतायाः अवच्छेद्यावच्छेदकभावोपगमाद्बाध प्रतिबध्यतावच्छेदकस्य प्रमात्वभ्रमत्वयोश्च संबन्धवि
शेषावच्छिन्नप्रकारताघटितत्वादुक्तानुपपत्तिवारणसंभवात्। न च प्रकारतानिरूपितसांसर्गिकविषयताश्रयत्वमेव संसर्गस्य प्रकारतावच्छेदकत्वमन्यस्य
दुर्वचत्वादिति संसर्गस्य विशिष्टधीविषयत्वसिद्धिर्निष्प्रत्यूहैवेति वाच्यम्। प्रतियोगित्वादिनिरूपिताया इव प्रकारतानिरूपिताया अपि संसर्गनिष्ठावच्छेदक
तायाः स्वरूपसंबन्धरूपत्वात्पदार्थान्तररूपत्वाद्विषयताविशेषात्मकत्वेपि तद्रूपतायास्तुल्यत्वात्तस्या विषयतात्वस्य निर्युक्तिकत्वात्। तादृशावच्छेदकताविशेषए
व च संसर्गता पदार्थः। न तु विषयताविशेषः। अथ संसर्गस्य विशिष्टबुद्ध्यविषयत्वे तत्संसर्गकज्ञाना त्तद्विशिष्टबुद्धितदुपनीतभानानुदयप्रसङ्गः। न च तत्तस्मोरुत्वा

ग·वि· त्स्यानुभविकत्वाभावादिष्टापत्तिः। तथा सति स्वरूपतो मनस्त्वादिविशिष्टवाचकमनःपदाद्युधीनशाब्दबोधानुपपत्तेः। तथा हि मनःपदात्स्वरूपतो मनस्त्वप्रकारि
५ काशाब्दधीर्भविष्यति तत्र च स्वरूपतस्तत्प्रकारकशक्तिज्ञानपदार्थोपस्थित्यादिः कारणम्। जातित्वादिना तत्प्रकारकशक्तिज्ञानादितो जातित्वादिनैव तत्प्रका
रकशाब्दबोधोदयात्। अन्यथा कदाचिज्जातित्वादिना तत्प्रकारकः कदाचित्स्वरूपतस्तत्प्रकारकशाब्दबोध उत्पद्यत इत्यत्र नियामकाभावप्रसङ्गात्। स्वरूपतस्त
त्प्रकारकशक्तिज्ञानपदार्थोपस्थित्यादिकं च स्वरूपतस्तद्विषयकज्ञानं विना न संभवति स्वरूपतस्तद्विशिष्टबुद्धौ स्वरूपतस्तद्विषयकज्ञानस्य हेतुत्वात्। स्वरूपतो मन-
स्त्वादिविषयकं च निर्विकल्पकज्ञानं न संभवति। अतीन्द्रियस्य निर्विकल्पकावेद्यत्वात्। निर्विकल्पकस्यालौकिकत्वनियमात्। स्वरूपतस्तत्प्रकारकज्ञानस्यापेक्षणे च तत्रा
पि तादृशज्ञानस्यापेक्षणीयतयानवस्थाप्रसङ्गः। अस्मन्मते च स्वरूपतः संसर्गविधया किंचित्ज्ञाने मनस्त्वादिभानं स्वीकृत्य तन्मूलकात्स्वरूपतस्तत्प्रकारशक्त्यादिज्ञा
नात्तथाविधशाब्दधिय उपपत्तिः॥ न चैवं स्वरूपतो निखिलजातिसंसर्गज्ञानात्स्वरूपतो निखिलजातिप्रकारकज्ञानसम्भवेन सार्वज्ञापत्तिरिति वाच्यम्। फलबलात्क
स्यचिदेव पदार्थस्य कदाचित्संसर्गविधया भानोपगमेन स्वरूपत संसर्गतया निखिलजातिभानस्य कदाप्यनुपगमादिति चेन्न। तत्संसर्गकज्ञानस्य तद्विशिष्टबुद्ध्य
जनकत्वेपि स्वरूपतो मनस्त्वप्रकारकस्मरणमूलकतथाविधशक्त्यादिज्ञानात्तथाविधशाब्दबोधनिर्वाहात्। न च स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारका
नुभवस्यापेक्षिततया तदसम्भवेन तदसंभव इति वाच्यम्। भवान्तरप्रभवानुभवाहितसंस्कारादेव तथाविधस्मरणोपपत्तेः। न च जन्मान्तरीयतथानुभवेपि पर्य्यनुयोगता
तादवस्थ्यम्। तत्र तत्तज्जन्मजाततथाविधानुभवाहितसंस्कारमूलकस्मरणसंगतित्वात्। जन्मप्रवाहस्यानादितया तादृशानवस्थायाश्चकिंचित्करत्वात्। अथवा
जातित्वादिना मनस्त्वप्रकारकेतद्वीयानुभवप्रभवसंस्कारादेव स्वरूपतस्तत्प्रकारकस्मरणमुत्पद्यते। सामान्यतस्तत्प्रकारकस्मरणे तत्प्रकारकत्वेनैव ज्ञानसंस्कारयोः का
रणत्वात्। स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकत्वेन तयोर्हेतुतायाः अप्रामाणिकत्वात्। न चैवं जातित्वादिना मनस्त्वादिप्रकारकानुभवस्य स्वरूपतो मनस्त्वादिप्रका ५

प्रकस्मृतिहेतुत्वेमनस्त्वादिप्रकारकस्मरणमात्रस्यैवस्वरूपतस्तत्प्रकारकत्वापत्तिरितिकेवलंजातिमानित्याकारकस्यस्मरणस्यविलोपप्रसङ्गइतिवाच्यम्।स्वरूपतस्तत्प्र
कारकस्मरणउद्बोधकविशेषस्यैवनियामकत्वात्।मनइत्याद्याकारकस्मरणंयत्रानुभवसिद्धंतत्रैवतादृशोद्बोधकस्यफलबलेनकल्पनीयत्वात्।अन्यथाजातित्वे
नस्वरूपतोमनस्त्वप्रकारकक्रमिकानुभवद्वयाहितसंस्कारवतः पुंसोभवन्मतेपिस्वरूपतोमनस्त्वप्रकारकजातिमानित्याकारकमनस्त्वप्रकारकस्मरणविलोपापत्तिः त
त्रजातित्वेनमनस्त्वप्रकारकसंस्कारात्स्वरूपतोमनस्त्वप्रकारकस्मरणंनसंभवतितत्रमनस्त्वांशेजातित्वभानेबाधकाभावादितिवाच्यम्।तदंशेजातित्वभानेपिजातिमन्
मनस्त्वेत्याकारकस्यतदंशेद्विविधविषयताशालिनस्मरणस्यसंभवात्।वस्तुतस्तज्जातित्वांशेमोषदशायांतथाविधसंस्कारान्मनइत्याकारकस्मरणंनिराबाधमेवतदं
शेमोषश्चतद्भासकोद्बोधकासमवधानम्।नचकिञ्चिद्रूपेणतत्प्रकारकसंस्कारादपिस्वरूपतस्तत्प्रकारकस्मरणस्यमोषवशादन्यतोजातित्वादिसामान्यप्रत्यासत्तिजन्य
तत्प्रकारकनिखिलजातिविषयकानुभवाहितसंस्काराज्जातित्वाद्यंशेमोषदशायांस्वरूपतोनिखिलजातिप्रकारकस्मरणसंभवात्सार्वज्ञापत्तिरितिवाच्यम्। उ
द्बोधकस्यफलबलकल्पनीयतयाजातित्वाद्यंशेमोषदशायांनिखिलजातिभासकोद्बोधकस्याकल्पनेनापत्तिविरहादित्यलंपल्लवेन।इत्थंचविशिष्टसंविदस्संब
न्धानवलम्बितानकथञ्चिदपिकंचिदनिर्वाहमावहतीतियुक्तितत्त्वानुतन्त्रसिद्धान्तविरोधः प्रतिरुणद्धि।केचित्तुविशिष्टसंसर्गकबुद्धौविशिष्टसंसर्गघटकविशे
षणीयसंसर्गतायांप्रकारतात्वेनतथाविधविशेष्यीयसंसर्गतायांविशेष्यतात्वमावश्यकम्। अन्यथाकम्बुग्रीवादिमत्त्वावच्छिन्नत्वरूपेणप्रतियोगितासंसर्गक
कम्बुग्रीवादिमान्नास्तीत्याद्याकारकबुद्धेर्भ्रमत्वानुपपत्तेः।तथाहि।तादृशज्ञानंअभावांशप्रतियोगितासंबन्धेनघटस्यभ्रमः।तेनसंबन्धेनाभावस्यघटवत्वात्।नापिक
म्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबन्धेनतदंशेतस्यभ्रमः।विशिष्टसंबन्धाप्र सिद्धेः।नापिस्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनतदंशेकम्बुग्रीवादिमत्त्वस्यभ्र
मः।तदंशेतस्याप्रकारत्वात्।तथासतितादृशधर्मविशिष्टत्वेनाभावोल्लेखापत्तेः।अतएवप्रतियोगितावच्छेदकत्वसंबन्धेनतादृशधर्मांशेऽभावस्यभ्रमइत्यपिनतदंशेऽभावस्या

ग·वि·
६

प्रकारत्वात्। नापि प्रतियोगितांशे कम्बुग्रीवादिमत्त्वावच्छिन्नत्वस्य प्रतियोगितावच्छेद्यत्वांशे कम्बुग्रीवादिमत्त्वस्य वा भ्रमः। तस्य संसर्गघटकतया अप्रकारकत्वादिति तस्या त्संसर्गताविशेषप्रकारतात्वविशेष्यतात्वे स्वीकृत्य पश्चान्निक्षिप्तपक्ष एवापेक्षणीय इति संसर्गस्यापि विशिष्टधीविषयतासिद्धेः प्रकारतात्वादेर्विषयतात्वव्याप्यत्वा दित्याहुः। तदपि न शोभनतया प्रतिभाति। उक्तबुद्धौ प्रतियोगिविशेषणतापन्नस्य कम्बुग्रीवादिमत्त्वादेरभावांशे प्रकारतोपगमे सन्निविरहेण तदंशे तद्भ्रमत्वस्यैव सम्भवात्। स्वातन्त्र्येण प्रकारतास्थल एव विशेषणवत्त्वेन विशेष्योल्लेखात्। अत एव दण्डी चैत्रः कुण्डलीत्यादिविशिष्टानुयोगिकवैशिष्ट्यबुद्धौ समानकालीनत्वसं बन्धं न विशेष्यतावच्छेदक दण्डादेर्विधेयकुण्डलाद्यंशे प्रकारत्वेऽपि न दण्डवत्कुण्डलीत्याद्याकारकता। न च प्रकारतायाः पारतन्त्र्यं दुर्निर्वचमिति वाच्यम्। उक्तस्थ ले प्रतियोगिनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदेनैवाभावांशे कम्बुग्रीवादिमत्त्वादेः प्रकारतोपगमात् तद्विशेष्यतानिरूपितप्रकारतावच्छिन्नत्वस्यैव तत्पारतन्त्र्य पदार्थत्वात्। यत्तु तत्र प्रतियोगिविशेष्यतयाऽभावविशेष्यतया च निरूपिता एकैव प्रकारता स्वीक्रियते। स्वातन्त्र्येण प्रकारतास्थले तु विशेष्यभेदेन प्रकारताभेदः तादृशप्रका रताया एकैकज्ञानसाधारणत्वात्। एवञ्च तदीयविशेष्यतानिरूपितप्रकारताभिन्नत्वमेव तत्पारतन्त्र्यम्। न चैवं सति तादृशज्ञानस्याभावांश इव प्रतियोग्यंशे स्वा वच्छिन्नप्रतियोगिताकत्वसम्बन्धेन कम्बुग्रीवादिमत्त्वप्रकारकत्वापत्तिः। अभावविशेष्यता निरूपिततत्सम्बन्धावच्छिन्नप्रकारताया एव भवन्मते प्रतियोगिविशे ष्यतानिरूपितप्रकारतात्मकत्वात् तथा च तादृशज्ञानं प्रतियोग्यंशेऽपि तस्य भ्रमः स्यादिति वाच्यम्। तादृशज्ञानस्य हि प्रतियोगिनिष्ठविशेष्यतानिरूपिततत्सम्बन्धाव च्छिन्नकम्बुग्रीवादिमत्त्वप्रकारताशालित्वेऽपि प्रतियोगिनिष्ठविशेष्यतानिरूपितायास्तादृशसंसर्गनिष्ठसंसर्गतानिरूपकतद्धर्मप्रकारकत्वं नास्ति तादृशसंसर्गनिष्ठ संसर्गताया अभावविशेष्यतयैव समं निरूप्यनिरूपकभावोपगमात्। इत्थं च तन्निष्ठविशेष्यतानिरूपिततत्संसर्गनिष्ठसंसर्गतानिरूपकतद्धर्मप्रकारकत्वमेव तदंशे तत्सम्बन्धेन तद्धर्मप्रकारकत्वमतो न दर्शिताऽतिप्रसङ्ग इति तदसत्। तथा सति प्रतियोग्यंशे तादृशज्ञानीयकम्बुग्रीवादिमत्त्वप्रकारताया अपि अभावपारतन्त्र्यापत्तेः।

नहिशिष्टबोधकशब्देनप्रतियोग्यनुल्लेखापत्तेः। अथप्रतियोगि विशेषणीभूतधर्मस्याभावांशेनिरुक्तप्रकारताकल्पनापेक्षयासंसर्गतायांप्रकारतात्वादि
कल्पनमेवोचितंधर्मिकल्पनातोधर्मकल्पनायालघुत्वात्। नचभवन्मतेपितद्धर्मावच्छिन्नत्वांशेप्रतियोगिसंसर्गीभूतप्रतियोगित्वविशेषणतयासंसर्गतायाः
कल्पनीयतयाधर्मिकल्पनमावश्यकमितिवाच्यम्। भवन्मतेप्यवच्छिन्नप्रतियोगिताकत्वांशेतद्धर्मनिष्ठप्रकारतानिरूपितसंसर्गतायाः कल्पनीयतयासंस
र्गताकल्पनस्यतुल्यत्वादितिचेन्न। अभावांशेप्रतियोगिविशेषणधर्मस्यप्रकारतामतेप्रतियोगिप्रकारतानिरूपितायाप्रतियोगित्वनिष्ठसंसर्गतासैवप्रतियोगि
विशेषणनिष्ठप्रकारतानिरूपितायाअवच्छिन्नत्वनिष्ठसंसर्गतातन्निरूपितापिएतावतैवतादृशधर्मस्यस्वावच्छिन्नप्रतियोगिताकत्वरूपसंसर्गभाननिर्वाहा
त्। एवञ्चतद्धर्मावच्छिन्नत्वविशेषितप्रतियोगितानिरूपकत्वप्रतियोगिसंसर्गतावादिनस्तवममचावच्छिन्नत्वप्रतियोगित्वनिरूपकत्वेषुचैकैकसंसर्गताकल्पने
स्यतुल्यतयातवतादृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततत्तद्धर्मनिष्ठसंसर्गताकल्पनेनचममतादृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततत्तद्धर्मनिष्ठप्रकारताक
ल्पनस्यतुल्यतयाभवतांसंसर्गतायांप्रकारतात्वादिकल्पनस्याधिक्यात्। नचभवन्मतेपितादृशप्रकारतायाः पारतन्त्र्यनिर्वाहायतत्रप्रतियोगिनिष्ठविशेष्यतानिरू
पितप्रकारतावच्छिन्नत्वकल्पनमधिकमितिवाच्यम्। भवन्मतेपितत्तद्धर्मनिष्ठप्रकारताविशेषात्मकसंसर्गतायाअवच्छिन्नत्वानुयोगिकसम्बन्धविशेषावच्छिन्न
त्वस्याधिकस्यकल्पनीयतयासाम्यात्। अथवाकिमेनावृतासूक्ष्मगवेषणायासेनास्तुसंसर्गताविशेषाणांप्रकारतादिविशेषरूपतानैतावतापिसंसर्गस्यविशिष्टधी
विषयतासिद्धिः। इतितिविघटितनिर्युक्तिकसिद्धान्तानिरोधनिस्सङ्कशृङ्खलानांविशेषात्वस्यप्रकारतात्वादिव्यापकताभङ्गभीकतयादुरभिभवत्वादितिवदन्ति। सं
सर्गतयात्वसमंप्रकारतायांविशेष्यतायांचनिरूप्यनिरूपकभावाख्यसंबन्धविशेषोऽभ्युपगन्तव्यः सचसंबन्धःकार्यत्वकारणत्वाधेयत्वाधारत्वप्रतियोगित्वानुयो
गित्वादीनांमिथस्तादृशसम्बन्धइवस्वरूपविशेषःपदार्थान्तरमेववा अन्यथातत्रतेनसम्बन्धेनतत्प्रकारकमित्येतदर्थस्यदुर्वचत्वात्। नचतत्तत्संसर्गकत्वेसतितन्निष्ठ

ग·वि· विशेष्यतानिरूपिततत्प्रकारताकत्वमेव तेन संबन्धेन तत्प्रकारकत्वमिति वाच्यम्। तथा सति भूतलादौ संयोगेन घटादिकं समवायेन च रूपादिकमवगाहमाना
७ याधियो भूतलांशे संयोगेन रूपादिप्रकारकत्वस्य समवायेन च घटादिप्रकारकत्वस्यापत्तेः एवं समवायेन कपालांशे संयोगेन च भूतलांशे घटमवगाहमानाया
बुद्धेः समवायेन भूतलांशे संयोगेन च कपालांशे घटप्रकारकत्वापत्तेः। तत्स्वीकारे च तन्निष्ठविशेष्यतानिरूपिततदीयसंसर्गतानिरूपिता या तदीयप्रकारता तत्प्र
तियोगित्वमेव तत्तदंशे तेन संबन्धेन तत्प्रकारकत्वम्। यस्य यस्य संबन्धो यत्र भासते तत्तदीयविशेष्यतातदीयप्रकारताभ्यामेव तदीयसंसर्गताया निरूप्यनिरूपकभावान्नो
क्तातिप्रसङ्गः। न च प्रकारतायाः संसर्गविशेषावच्छिन्नतया तत्संसर्गावच्छिन्नतदीयप्रकारतानिरूपिततदीयविशेष्यताकत्वमेव तेन संबन्धेन तत्तदंशे तत्प्रकारकत्व
मस्तु किमुक्तनिरूप्यनिरूपकभावोपगमेनेति वाच्यम्। संसर्गनिष्ठावच्छेदकतानिरूपकत्वरूपसंसर्गावच्छिन्नत्वस्य प्रकारतायां स्वीकृतावेव संसर्गताप्रकारत
योर्निरूप्यनिरूपकभावसिद्धेः। संसर्गतायास्संसर्गनिष्ठावच्छेदकतारूपत्वात् न चैवमपि प्रकारतयैव समं तस्या निरूप्यनिरूपकभावोऽस्तु। ननु विशेष्यतयापि
सममुक्तबुद्धिनिरूपितायाः समवायनिष्ठसंसर्गतानिरूपितघटप्रकारताया भूतलविशेष्यतानिरूपितत्वविरहात्। संयोगनिष्ठसंसर्गतानिरूपिततत्प्रकार
तायाश्च कपालविशेष्यतानिरूपितत्वविरहादुक्तातिप्रसङ्गवारणादिति वाच्यम्। विनिगमनाविरहेणैव विशेष्यतयापि समं तस्या निरूप्यनिरूपकभावसिद्धेर्निष्प्र
त्यूहत्वात्। एवञ्च विशेष्यताप्रकारतयोस्साक्षान्निरूप्यनिरूपकभावोऽप्रामाणिकः। किन्तु प्रकारताया विशेष्यतानिरूपितसंसर्गतानिरूपितत्वमेव विशेष्यतानि
रूपितत्वं विशेष्यतायां प्रकारतानिरूपितसंसर्गतानिरूपितत्वमेव च प्रकारतानिरूपितत्वं कार्य्यकारणभावावच्छेदककोटौ यत्र प्रकारविशेष्यतयो निवेश
स्तत्र संसर्गस्याप्यवश्यं निवेशात्तयोर्निरूप्यनिरूपकभावानभ्युपगमेपि गौरवानवकाशादिति ध्येयम्। प्रकारता च द्विविधा निरवच्छिन्ना विशेषणान्तरावच्छि
न्ना च तत्र निरवच्छिन्ना पटइत्याद्याकारकज्ञानीयघटत्वादि प्रकारता तत्र स्वरूपत एव घटत्वादेर्भानात्। विशेषणान्तरावच्छिन्ना च घटत्ववदिति ज्ञाने। तत्र घ ७

त्वत्वरूपधर्मान्तरस्यापि विशेषणत्वात् तादृशी च प्रकारता जात्यखण्डोपाधिभिन्नेन स्वीक्रियते सावच्छिन्ना च घटवदित्यादिज्ञानीयघटादिप्रकारता। तत्र घट
त्वादेरवच्छेदकत्वात्। न च तादृशप्रकारताया घटत्वादिना सममवच्छेद्यावच्छेदकभावो निर्युक्तिकः द्रव्यं घटवदित्यादिज्ञानात् तादृशज्ञानस्य घटांशेऽपि भिन्नप्र
कारकत्वेनैव वैलक्षण्योपपत्तेरिति वाच्यम्। तादृशज्ञानीयघटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वानुपगमे द्रव्यं घटवद्भूतलं घटश्चेत्याद्याकारकसमूहालम्बनात्मकज्ञाना
द्घटवद्भूतलं द्रव्यं चेति समूहालम्बनस्यैव वैलक्षण्यानुपपत्तेः। उभयोरेव घटांशे द्रव्यत्वघटत्वोभयप्रकारकत्वाद्भूतलांशे घटप्रकारकत्वाच्च। तन्मते पुनराद्ये द्रव्य
त्वावच्छिन्ना घटीया प्रकारता अन्ते च घटत्वावच्छिन्ना सेति प्रकारतावैलक्षण्यात्तयोर्वैलक्षण्यम्। वस्तुतस्तु घटत्वादिनिष्ठप्रकारतानिरूपितत्वमेव घटादिप्रकारताया
घटत्वाद्यवच्छिन्नत्वम्। न च प्रकारताविशेष्यतयोरेव निरूप्यनिरूपकभावो न तु प्रकारतयोरपीति वाच्यम्। तत्र घटादिनिष्ठाया भूतलादिनिष्ठविशेष्य
तानिरूपितप्रकारताया एव घटत्वादिप्रकारतानिरूपितविशेष्यतात्मकत्वात्। तादृशप्रकारतयोर्निरूप्यनिरूपकभावोपपत्तेः। केचित्तु घटत्वप्रकारतानिरूपितवि
शेष्यतावच्छेदेन भूतलांशे घटस्य प्रकारता घटवदित्येतादृशज्ञाने स्वीक्रियते अत एवोक्तज्ञानयोर्भेद इत्याहुः तच्चिन्त्यम्। परे तु घटवदित्याद्याकारकं विशिष्टविशे
षणकज्ञानं द्विविधं विशिष्टवैशिष्ट्यबोधात्मकं केवलं विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति रीत्या घटत्वाद्यवगाहि। तत्र प्रथमे घटत्वादेः प्रकारतावच्छेदकत्वम्। द्वि
तीये तु प्रकारतात्मकविशेष्यतानिरूपितं प्रकारत्वं न तु प्रकारतावच्छेदकत्वमपीत्याहुः। तत्त्वं विशिष्टवैशिष्ट्यविचारे स्फुटीभविष्यति। विशेष्यता च क्वचिन्निरवच्छिन्ना क्व
चिच्च विशेषणान्तरावच्छिन्ना तत्र निर्धर्मितावच्छेदके घट इत्याद्याकारकज्ञाने घटत्वादिप्रकारतानिरूपितविशेष्यता निरवच्छिन्ना अयं घट इत्याद्याकारकसधर्मितावच्छे
दकघटत्वादिविशिष्टबुद्धौ च घटत्वादिप्रकारतानिरूपितविशेष्यता इदन्त्वाद्यवच्छिन्ना। अत एव इदन्त्वादिकं तत्र धर्मितावच्छेदकमित्युच्यते। विशेष्यतावच्छेदक
ताया एव धर्मितावच्छेदकतापदार्थत्वात्। विशेष्यतानिरूपितमवच्छेदकत्वं च न तन्निरूपितप्रकारकत्वम्। तथा सति घट इत्यादिज्ञाने अयं घट इत्यादिज्ञाने च घटत्वस्य धर्मिता

ग·वि· वच्छेदकत्वापत्तेः। निर्धर्मितावच्छेदकविशिष्टबुद्धिविलोपप्रसङ्गाच्च। किन्तुप्रतियोगित्वादिनिरूपितावच्छेदकत्ववत्स्वरूपविशेषः। पदार्थान्तरमेववा। अथवाप्रका
८ रताविशेषएवतत् अन्यथास्वधर्मितावच्छेदकज्ञानस्यधर्मितावच्छेदकप्रकारकत्वोपपत्तयेतन्निष्ठतज्ज्ञानीयप्रकारतान्तरकल्पनेगौरवात्। नचज्ञानान्तरस्थतद्धर्मनि
ष्ठप्रकारतयैवोपपत्तेर्नातिरिक्तप्रकारताकल्पनमितिवाच्यम्। एवमपितद्धर्मितावच्छेदकसमानविषयताकानन्तज्ञानेषुतादृशप्रकारताप्रतियोगित्वकल्पनापेक्षयातावत्सा
धारणैकधर्मितावच्छेदकतायांप्रकारतात्वकल्पनेलाघवात्। नचैवमयंघटइत्यादिज्ञानेइदन्त्वादेस्तस्यापिधर्मितावच्छेदकत्वापत्तिरितितत्तोऽप्ययमित्याद्याकारकस्मर
णप्रसङ्गइतिवाच्यम्। यत्तत्तदीयप्रकारतानिरूपितायाधर्मितावच्छेदकतायाआश्रयएवतत्तदीयधर्मितावच्छेदकः। उक्तस्थलेचेदन्त्वनिष्ठधर्मितावच्छेदकतायास्स्वात्मकप्रकारता
यांनिरूप्यनिरूपकभावविरहान्नातिप्रसङ्गः। नचैवमपीदन्त्वादिकंघटत्वादेरपिधर्मितावच्छेदकंनस्यात्। तन्निष्ठधर्मितावच्छेदकतयाघटत्वादिप्रकारतायाअपिनिरूप्यनि
रूपकभावेमानाभावात्। परम्परयानिरूप्यनिरूपकभावस्यचप्रकृतेऽपिसत्त्वादितिवाच्यम्। एतदनुरोधेनैवधर्मितावच्छेदकत्वविशेषणीयप्रकारत्वयोरपिनिरूप्यनिरूपक
भावोपगमात्। यत्प्रकारतानिरूपितत्वावच्छेदेनविशेष्यतायायदवच्छेद्यत्वंसएवतद्धर्मितावच्छेदकः। उक्तस्थलेचस्वप्रकारतानिरूपितत्वावच्छेदेननविशेष्यताया
स्स्वावच्छेद्यत्वमतोनस्वांशेस्वस्यधर्मितावच्छेदकत्वापत्तिरित्याहुः। विशेष्यताचसमूहालम्बनेप्रकारभेदाद्भिद्यते। समूहालम्बनस्यप्रत्येकप्रकारकज्ञानसामग्री
समाजनियततयाप्रत्येकप्रकारकज्ञानीयनानाविशेष्यताप्रतियोगित्वस्यैवतत्रसत्त्वात्। अयंघटोदण्डीकुण्डलीत्याद्याकारकैकधर्मितावच्छेदककापरधर्मप्रकारक
ज्ञानेधर्मितावच्छेदकतायाःप्रकारताविशेष्यत्वमतेउभयप्रकारतानिरूपिताएकैवविशेष्यता। धर्मितावच्छेदकेज्ञानान्तरसाधारणप्रकारतास्वीकारकल्पेतुप्रकार भेदेन
विशेष्यताभेदः। यदिचसमूहालम्बनविलक्षणोविशेषणविशेष्यतावच्छेदकभावानापन्नखड्गकुण्डलाद्युभयविशिष्टविषयकः खड्गीकुण्डलीचैत्रइत्याद्याकार
कबोधोऽनुभवसिद्धस्तदातत्राप्युभयप्रकारतानिरूपितैकविशेष्यता। अन्यथासमूहालम्बनात्तद्वैलक्षण्यानुपपत्तेः। एवंमिथोविशेषणविशेष्यतावच्छेद ८

कभावानापन्नखड्गकुण्डलोभयादिकं यत्र शौर्य्यादिधर्मितावच्छेदकतया भासते खड्गी कुण्डली चैत्रः शूर इत्याद्याकारके तादृशबोधे च खड्गकुण्डलोभयादिप्र
कारतानिरूपितैकविशेष्यतातादृशविशेष्यतावत्तादृशोभयाद्यवच्छिन्नशौर्य्यादिप्रकारतानिरूपितविशेष्यताते भिन्नाऽभिन्ना वेति तु पूर्वोक्तवदूहनीयम्। एवं ख
ड्गाद्येकतरधर्मितावच्छेदकतानापन्नस्यैवापरस्य कुण्डलादेर्विधेयधर्मितावच्छेदकत्वं यत्र तत्र खड्गादिप्रकारतानिरूपितकुण्डलाद्यवच्छिन्नविशेष्यताविधे
यप्रकारतानिरूपितोभयधर्मावच्छिन्नविशेष्यतयोरभेदः। अन्यथा मिथो विशेषणविशेष्य तावच्छेदकभावानापन्नखड्गकुण्डलोभयधर्मावच्छिन्नविशेष्यक
शौर्य्यादिविधेयकबोध एव यत्र स्वातन्त्र्येण कुण्डलस्य खड्गधर्मितावच्छेदकतया भानं तादृशसमूहालम्बनात्तस्य वैलक्षण्यानुपपत्तेः। एवञ्च सति खड्गादेः ख
ड्गादिप्रकारतानिरूपितविशेष्यताया अवच्छेदकत्वेऽपि यथा न तस्य स्वधर्मितावच्छेदकत्वं तथोपपादितं प्रागेव तत्रोक्तविशेष्यते भिन्न एव किन्त्वेकविशेष्यतापरविशे
ष्यतावच्छेदकभावापन्नेति समूहालम्बनाद्विशेष इत्यप्याहुः। इत्थं प्रकारतादिवद्विधेयत्वमपि विषयतान्तरं न तूक्तप्रकारत्वमेव न तद्धर्मितावच्छेदकस्यापि तथात्वा
पत्तेः। अथ विशेष्यतावच्छेदकताभिन्नमुख्यविशेष्यतानिरूपितप्रकारतैव विधेयता पर्वतो वह्निमानित्यादौ च पर्वतत्वादिरूपधर्मितावच्छेदकनिष्ठप्रकारता धर्मि
तावच्छेदकतात्मिकैव धर्मितावच्छेदकतायाः प्रकारतात्वस्य व्यवस्थापितत्वात्। अतो न तत्र पर्वतत्वादेर्विधेयतापत्तिः। तादृशज्ञाने वह्न्यादेरिव वह्नित्वादेर्वह्निमत्प
र्वतवान्देश इत्यादौ च वह्नेर्विधेयतावारणाय मुख्यविशेष्यतानिरूपितत्वं विशेषणम्। मुख्यत्वञ्च विशेष्यतायां प्रकारता नवच्छिन्नत्वं प्रकारताभिन्नत्वं वा।
न च विशेष्यतावच्छेदकताभिन्नत्वाद्युपस्थितिं विनापि पर्वतो वह्निमानित्याद्यनुमित्यनन्तरं पर्वते वह्निमनुमिनोमीत्याद्याकारकस्य वह्न्यादिविधेयकत्वावगाहिनोऽनुव्यवसा
यस्योत्पत्त्या निरुक्तप्रकारताया विधेयतात्मकत्वं नोपपद्यत इति वाच्यम्। वह्निप्रकारकानुमितित्वस्यैव तादृशानुव्यवसायविषयत्वोपगमात्। न चैवं वह्निमान्पर्वतो घटवा
नित्यनुमित्यनन्तरमपि तादृशानुव्यवसायापत्तिरिति वाच्यम्। निरुक्तनिष्ठप्रकारताकत्वस्य तत्प्रकारकानुमितित्वव्यञ्जकतया तादृशापत्त्यसम्भवात्। भवन्मते पित

ग॰वि॰ द्विधेयकानुमितौ यथाकथञ्चिदुपस्थिततत्तद्विधेयकत्वग्रहवारणाय तत्तद्विधेयकत्वहेतुताया आवश्यकत्वात्। न च तादृशानुव्यवसाये तन्निष्ठविलक्षणविषयताऽऽरू
१ पविधेयतायाः प्रतियोगितासंबन्धेन हेतुत्वकल्पनापेक्षया निरुक्ततन्निष्ठप्रकारताया गुरुशरीरायास्तत्संबन्धेन हेतुताकल्पने गौरवाद्विलक्षणविषयतासिद्धिरिति वा
च्यम्। कार्यकारणभावलाघवानुरोधेन जात्यतिरिक्तपदार्थसिद्धेरसिद्धान्तविरुद्धत्वात्। अन्यथा धूमादिपरामर्शजन्यतावच्छेदकतयाऽऽलोकादिलिङ्गकानुमिति
व्यावृत्तविलक्षणविषयतासिद्धिप्रसङ्गात्। न च निरुक्तप्रकारतातोऽतिरिक्तैव विधेयताख्यविषयता। अन्यथा धर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां वह्नि
मान्पर्वतो घटवानित्याद्यनुमित्यनन्तरं पर्वते घटमनुमिनोमि न वह्निमित्याद्याकारकस्य वह्निविधेयकत्वाभावावगाहिनोऽनुव्यवसायस्यापलापप्रसङ्गात्। वन्ह्यादिप्र
कारकाऽनुमितिविषयकस्य वह्निप्रकारकत्वसामान्याभावावलम्बनत्वासम्भवादिति वाच्यम्। धर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां तादृशप्रतीतेः प्रा
माणिकत्वे निरुक्तप्रकारताया एव विधेयतात्वाख्यधर्मविशेषं स्वीकृत्य तेन रूपेण निरुक्तप्रकारतायाः प्रतियोगितासंबन्धावच्छिन्नाभावस्यैव तादृशप्रतीतिवि
षयतायाः स्वीकरणीयत्वात्। भवन्मतेपि संबन्धादिभेदभिन्नविषयतानामनुगमाय तादृशातिरिक्तधर्मस्वीकारस्यावश्यकत्वात्। अन्यथा विधेयतानामननुगमेन तत्प्रस
क्तसामान्यधर्मावच्छिन्नाभावासम्भवेन तत्तद्व्यक्तित्वावच्छिन्नाभावकूटस्यैव तादृशप्रतीतिविषयतायाः स्वीकरणीयतयाऽभावकूटस्य विशिष्य युगसहस्रेणापि
ग्रहीतुमशक्यतया तादृशप्रतीतेरेवानुपपत्तेः। विधेयताप्रतियोगिकाभावत्वेन तावदभावानां तद्विषयत्वोपगमे तादृशप्रतीतेः प्रतियोगितावच्छेदकतानवगा
हितया वह्निमनुमिनोमीत्यादिप्रतीतेर्विरोधित्वानुपपत्तेरिति चेन्न निरुक्तप्रकारताया एव विधेयतात्वे पृथिव्यां जलादिभेदो ह्रदे धूमाभाव इत्याद्याकारकसा
ध्यविशेष्यकानुमितीनां तद्विधेयकत्वानुपपत्तेः। तथाविधानुमितिविशेष्यतायां विधेयतात्वोपगमान्नेयमनुपपत्तिरिति चेन्न। तर्हि तादृशानुमितिविशेष्यता
यास्तत्समानप्रकारकसमानविशेष्यकपृथिव्यादिसाध्यकानुमितावपि सत्वेन तस्या अपीतरभेदादिविधेयकत्वापत्तेः। अथ पृथिव्यादिपक्षकतादृशानु

मितितत्साध्यकतादृशानुमित्योर्भिन्नभिन्नैवतादृशीविशेष्यताएवञ्चसाध्यविशेष्यकाऽनुमितिविशेष्यतायामेवविधेयताभ्युपेयतइतिनोक्तातिप्रसङ्ग
इतिचेन्न।साध्यविशेष्यकानुमितावतिरिक्तविधेयतात्मकविशेष्यतोपगमेइतरभेदः पृथिव्यामित्याद्याकारकपृथिवीसाध्यकानुमितौविधेयतानात्मकंवि
विशेष्यतान्तरंतथाविधप्रत्यक्षेवाऽन्यद्विशेष्यत्वमितितिसृणांविशेष्यतानांकल्पनापेक्षयाप्रत्यक्षानुमितिसाधारण्याएकविशेष्यतायास्साध्यविशेष्यक
साध्यविशेषणकानुमितिसाधारण्याएकस्याविधेयतायाश्चकल्पनस्यैवोचितत्वात्।नचास्मन्मतेऽनुमितौयाविधेयतानात्मिकाविशेष्यतासैवप्रत्यक्षेपीतिन
विशेष्यतात्रयकल्पनमितिवाच्यम्।प्रत्यक्षेविधेयतात्मिकानद्भिन्नात्मिकावाविशेष्यताकल्प्यतइत्यत्रविनिगमनाविरहात्।यत्तुसाध्यविशेषणकानुमितौक्लृ
प्तनिरुक्तप्रकारतैवविधेयता अतिरिक्तविधेयतातुसाध्यविशेष्यकानुमितावेव अनन्तसाध्यविशेषणकानुमितिव्यक्तिष्वतिरिक्तविधेयतासंबन्धकल्पनापेक्षयातन्नि
रूपितत्वस्यैवनिरुक्तप्रकारतासुविधेयतात्वकल्पनेलाघवादिति तद्पिनचारु तादृशप्रकारतायाविधेयतात्वोपगमेपर्वतोवन्हिमान्पर्वतोनिर्धूमस्स्यादित्याकारसमूहा
लम्बनापत्त्यात्मकज्ञानस्यवन्ह्यादिविधेयकत्वापत्तेः।नचेष्टापत्तिः।तथासतितादृशापत्त्यनन्तरंपर्वतेधूमाभावमापादयामितुवन्हिमित्याकारकवन्हिविधेयकत्वा
भावप्रतीतेरनुपपत्तेः।एतेनसाध्यविशेष्यकानुमितिरेवाप्रामाणिकी।अप्रसिद्धसाध्यकस्थलेविशेष्येविशेषणमितिरीत्यासाध्यविशेषणकानुमितिरेवोत्पद्यतेविशिष्ट
बुद्धिसामान्येविशेषणज्ञानहेतुतायानिर्युक्तिकत्वात् तथाचनिरुक्तप्रकारतैवविधेयताभावसाध्यकस्थलेतुसाध्यविशेष्यकानुमितेरत्यन्ताप्रामाणिकत्वात्तत्रसुतरा
मेवेत्यपिनिरस्तम्।यत्त्वनुमितावापत्तौचतद्व्याप्यवत्ताज्ञानजन्यत्वमेवतद्विधेयकत्वमिति।तद्सत् यतोऽतिरिक्तविधेयतानभ्युपगमेतद्व्याप्यवत्ताज्ञानस्यसानन्तरोत्प
न्नतत्प्रकारकानुमितित्वादिकमेवजन्यतावच्छेदकंवाच्यम्।ननुतत्रतद्विधेयतानिवेशासंभवः।आत्माश्रयप्रसङ्गात्।तथाचसिध्यभावापाद्यव्यतिरेकनिश्चय
रूपकारणासमवहितवह्निव्याप्यवत्ताज्ञानानन्तरोत्पन्नयोर्वन्हिमत्पर्वतमत्वा वह्निन्नपक्षकघटादिविधेयकानुमित्यापाद्योरपितादृशज्ञानजन्यतयावन्हिविधेयकत्वप्रस

गा·वि· १० द्व। इति पक्षताविशेषादिजन्यत्वस्य विधेयताशरीरघटकत्वे पक्षताद्युपस्थितिविरहकालेपि सर्वानुभवसिद्धाया वह्निं नानुमिनोमीत्याद्याकारकप्रतीतेरपलापप्रसङ्गा
त्। न च पक्षताविशेषादिजन्यत्वविशिष्टस्य व्याप्यवत्ताज्ञानजन्यत्वसंबन्धेन वह्न्यादिमत्त्वस्यैव तादृशप्रतीतिविषयोस्तु तत्र च न पक्षताद्युपस्थितेरपेक्षा संबन्धज्ञा
नस्य विशिष्टबुद्धौ हेतुत्वादिति वाच्यम्। अनन्तपदार्थस्य घटिततादृशधर्मस्य संबन्धत्वे मानाभावात्। एवमेतन्मते शाब्दबोधस्य सविधेयकत्वानुपपत्तिस्तस्य व्याप्य
वत्ताज्ञानाजन्यत्वात्। नन्वत्र निरुक्तप्रकारैतैव विधेयतेति वाच्यम्। पर्वते वह्निरित्यादिवाक्यजन्यशाब्दबोधे वह्न्यादेर्विधेयत्वानुपपत्तेः। न च तत्र वह्न्यंशे पर्वतो विधेयं त
नु पर्वतांशे वह्निरिति वाच्यम्। शाब्दबोधे चरमनिर्दिष्टपदार्थस्यैव विधेयत्वात्। अत एव न्यक्कारो ह्ययमेव मे यदरयः इत्यादौ विधेयत्वेन तात्पर्यविषयस्य न्यक्कारादेः
प्राङ्निर्दिष्टपदोपस्थाप्यतया न विधेयकान्वयबोधासंभवादालङ्कारिका विधेयाविमर्षदोषमुदाहरन्ति। अत एव गुणानां गुणत्वमित्यादौ गुणत्वस्यैवोद्देश्यतावच्छेदकत
या विधेयतया चान्वयबोधानुपपत्तिराशङ्किता वर्द्धमानोपाध्यायैः। विशेष्यस्य विधेयत्वे तु गुणत्वस्य तदनुपपत्त्या तादृशाशङ्काऽसङ्गतेः न च पदार्थानुमाने गुणत्वरूपलक्ष्य
तावच्छेदकधर्मावच्छिन्नेतरभेदसाधनाय प्रयुक्तादितरव्यापकीभूताभावप्रतियोगिगुणत्ववानयमित्येतादृशोपनयावयवादन्वयबोधानुपपत्तिरेवैतैराशङ्कितेति वाच्यम्
तत्र दण्डवान्नक्तं दण्डवानित्यादाविव विधेयांशे व्याप्तिभानाधिकेन गुणत्वसंबन्धिन एवाभेदसंबन्धेन विधेयतया चान्वयबोधानुपपत्तिविरहात्। न च नामार्थयोः साक्षादन्वय
स्याव्युत्पन्नतया पर्वते वह्निरित्यादौ पर्वतांशे कथं विधेयतयान्वय इति वाच्यम्। साक्षाद्विशेषणविशेष्यभावेनान्वयस्यैव नामार्थयोरनभ्युपगमात्। अत्र परम्परयैव विशेष्य
विशेषणभावोपगमात्। अथ शाब्दबोधे चरमनिर्दिष्टपदार्थस्य विधेयत्वे वपुर्विरूपाक्षमित्यादौ। अक्ष्णो वैरूप्यस्य विधेयत्वानुपपत्तिः वैरूप्यविशिष्टस्याक्ष्ण एव तत्र वपुरंशे विधे
यत्वे अलक्ष्यजन्मनेत्यत्रापि अलक्ष्यजन्मताया एव विधेयतया तात्पर्यविषयत्वमित्यस्य वक्तुं शक्यतया अलक्ष्यताया अविधेयत्वेनाविमृष्टविधेयांशोदाहरणताया अनुपपत्तेः
यदि च तत्र शम्भुरस्य जन्मनो विवक्षितमहादेवापकर्षासंपादकतया न विधेयत्वेन विवक्षितत्वम्। अपि तु जन्मनोऽलक्ष्यताया एवेति मन्यते तदा तुल्यं प्रकृतेपीति चेन्न समासातिरिक्तस्य १०

ग॰वि॰ लेऽचरमनिर्दिष्टस्यविधेयतानियामकत्वात्।एवंनिरुक्तप्रकारतापाविधेयतात्वेद्वितीयमौर्वीमिवेत्यादौविधेयत्वेनविवक्षितस्यसमासघटकपूर्वपदेनप्रतिपादनेविधेयावि
२१ मर्शः।मौर्वींद्वितीयामिवेत्यसमस्तपदेनप्रतिपादनेदोषोद्धारइत्यालङ्कारिकप्रवादविरोधश्चेति।विधेयतावन्निरूपितोद्देश्यतापिप्रकारतादिभिन्नविषयताविशेषएवनचैवं
विशेष्यतेवोद्देश्यतापर्वतोवह्निरित्यादिवाक्यजन्यशाब्द बोधसाध्यविशेष्यकानुमितेःप्रामाणिकत्वेनतत्रचपर्वतस्योद्देश्यतानुपपत्तेः।नचविधेयतानिरूपकत्वमुद्दे
श्यत्वंनत्वपदंशेविधेयस्यविधेयत्वंतस्यविशेष्यत्वेप्रकारत्वेचास्तनमेवेतिकिमुद्देश्यताख्यातिरिक्तविषयत्वोपगमेनेतिवाच्यम्।।उद्दे श्यत्वमेवातिरिक्तंतन्निरूपकत्वमेव
विधेयत्वमित्यस्यापिवक्तुंशक्यतयाविनिगमनाविरहेणोभयस्यैवातिरिक्ततासिद्धेः।इदन्त्ववधेयम्।।अस्तुविधेयत्वमुद्देश्यत्वमतिरिक्तंनयोर्विषयतात्वेमानाभावः पर्व
तोवह्निमानित्यनुमितौपर्वत वह्न्यादिषुतथाविधप्रत्यक्षसाधारणविशेष्यताप्रकारतास्वीकारस्यावश्यकतयातत्तएवतादृशज्ञानस्यतद्विषयाकत्वोपपत्तेः।प्रकारतादीनां
तन्त्रानुपगमेतादृशानुमित्यादीनांबाधाद्यप्रतिबध्यत्वप्रसङ्गः।विरोधिज्ञानाप्रतिबध्यकत्वप्रसङ्गश्च।प्रकारतादीनामेवतादृशप्रतिबध्यप्रतिबन्धकभावावच्छेदकत्वादि
तिदिक्।इतिगदाधरभट्टाचार्यकृतोविषयतावादस्समाप्तः।।वाराणसीप्रसादस्यनियोगेनप्रयत्नतः।।काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः।।१।।श्रीकाशीजीमे
महल्लेहौरकटोराश्रीयुतबाबूवाराणसीप्रसादजीकेमकानमेंकाशीसंस्कृतमुद्रापंत्रमेछपीजिनकोलेनाहोयउनकोउक्तस्थानमेंश्रीबाबूवाराणसीप्रसादजीकेपास
याकचोडीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी।।सम्वत्१९४३।।

॥ इतिविषयतावादः समाप्तः ॥